## छन्दसि घस् । (१०६/३४९८)

ऋतुशब्दाच् छन्दसि विषये घस् प्रत्ययो भवति तदस्य प्राप्तम् इत्यस्मिन् विषये । अणोऽपवादः । 'अयं ते योनिर्ऋत्वियः' (ऋ. ३.२९.१०) ॥

## कालाद्यत् । (१०७/१७७०)

[1]कालशब्दात् यत् प्रत्ययो भवति तदस्य प्राप्तम् इत्यस्मिन् विषये । कालः प्राप्तोऽस्य काल्यः [2]तापः । काल्यं [3]शीतम् ॥

## प्रकृष्टे ठञ् । (१०८/१७७१)

कालात् इत्येव, तदस्य इति च । प्राप्तम् इति निवृत्तम् । [4]प्रकर्षेण कालो विशेष्यते । [5]प्रकर्षे वर्तमानात् [6]कालात् प्रथमासमर्थाद् अस्य इति षष्ठ्यर्थे ठञ् प्रत्ययो भवति[7] । प्रकृष्टो दीर्घः कालोऽस्य कालिक[8]मृणम् । कालिकं वैरम् । ठञ्ग्रहणं विस्पष्टार्थम् ॥

## प्रयोजनम् । (१०९/१७७२)

तदस्य [9]इत्येव । तद् इति प्रथमासमर्थात् अस्य इति षष्ठ्यर्थे ठञ् प्रत्ययो भवति, यत् तत् प्रथमासमर्थं प्रयोजनं चेद् तद् भवति । इन्द्रमहः प्रयोजनमस्य ऐन्द्रमहिकम् । [10]गाङ्गामहिकम् ॥

## विशाखाषाढादण् मन्थदण्डयोः । (११०/१७७३)

विशाखाषाढाशब्दाभ्याम् अण् प्रत्ययो भवति तदस्य प्रयोजनम् इत्येतस्मिन् [11]विषये [12]यथासङ्ख्यम् मन्थ-दण्डयोर[13]भिधेययोः । [14]विशाखा प्रयोजनमस्य वैशाखो मन्थः । आषाढो दण्डः ।

[५३४] चूडादिभ्य उपसङ्ख्यानम् ।

चूडा प्रयोजनमस्य चौडम्[15] । श्रद्धा प्रयोजनमस्य श्राद्धम् ॥

## अनुप्रवचनादिभ्यश्छः । (१११/१७७४)

[16]अनुप्रवचनादिभ्यः प्रातिपदिकेभ्यः छः प्रत्ययो भवति तदस्य प्रयोजनमित्यस्मिन्[17]विषये ठञोऽपवादः । अनुप्रवचनं प्रयोजनमस्य अनुप्रवचनीयम् । उत्थापनीयम् ।

[५३५] विशिपूरिपति[18]रुहिप्रकृतेरनात् सपूर्वपदादुपसङ्ख्यानम् । (म.भा. २.३६२)

गृहप्रवेशनं प्रयोजनमस्य गृहप्रवेशनीयम् । प्रपापूरणीयम् । अश्वप्रपतनीयम् । प्रासादारोहणीयम् ।

[५३६] स्वर्गादिभ्यो यद् वक्तव्यः । (म.भा. २.३६२)

स्वर्गः प्रयोजनमस्य स्वर्ग्यम्[19] । यशस्यम् । आयुष्यम् । काम्यम् । धन्यम् ।

---

1. तदस्य प्राप्तमित्येव इत्यधिकम् ब.क. 2. स्वापः ड. 3. गीतम् ग. 4. प्रकृष्टेन क.ह. 5. प्रकृष्टे क.ड, प्रकृष्टे प्रकर्षेऽर्थे ह. 6. कालशब्दात् ह.फ. 7. तदस्य प्राप्तमित्येतस्मिन् विषये इत्यधिकम् फ. 8. मरणम् ह. 9. इति फ. 10. गाङ्गमहिकम् ड, गङ्गामहिकम् क. 11. अर्थे क.ड.ह. 12. यथासङ्ख्यम् नास्ति फ. 13. अर्थयोः फ. 14. ठञोऽपवादः इत्यधिकम् फ. 15. कर्म इत्यधिकम् ग. 16. अनुप्रवचन इत्येवमादिभ्यः फ. 17. अर्थे ह. 18. पदि इत्यधिकम् भाष्ये। 19. स्वर्गारोहणीयम् इत्यधिकम् ब.